International Journal of Sanskrit Research 2022; 8(1): 284-285

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 284-285
© 2022 IJSR
www.anantaajournal.com
Received: 23-11-2021
Accepted: 09-01-2022

**अश्विनी गंगाधर देशपांडे**
शोधच्छात्रा, केन्द्रीयसंस्कृतविश्वविद्यालयः
गुरुवायूर-परिसरः, पुरनाट्टुकरा, तृश्शूर,
केरलम्, भारत

**Corresponding Author:**
**अश्विनी गंगाधर देशपांडे**
शोधच्छात्रा, केन्द्रीयसंस्कृतविश्वविद्यालयः
गुरुवायूर-परिसरः, पुरनाट्टुकरा, तृश्शूर,
केरलम्, भारत

# कृष्णलीलाशुकस्य कालवधकाव्ये अनुप्रासालङ्कारस्य सन्निवेशः

**अश्विनी गंगाधर देशपांडे**

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i1e.1654

**भूमिका –**
भक्तकविः कृष्णलीलाशुकः कृष्णकर्णामृतकर्ता इति नाम्ना संस्कृतसाहित्यजगति सुप्रसिद्धः वर्त्तते। एतस्य अन्यतमा रचना कालवधकाव्यम्। एतत् सर्गत्रयात्मकं खण्डकाव्यम् अस्ति। अस्मिन् मार्कण्डेयस्य रक्षणार्थं महादेवेन कालः हतः इति प्रसिद्धा पौराणिककथा वर्णितास्ति । कालवधकाव्ये त्रिष्वपि सर्गेषु प्रचुरमात्रायाम् अनुप्रासो दृश्यते अतः अनुप्रासमयं कालवधकाव्यमिति नातिशयोक्तिः॥
आलङ्कारिकाणां परम्परायाम् अलङ्करोति इति अलङ्कारः इति व्युत्पत्त्या काव्यस्य शोभाकराः धर्माः अलङ्काराः इति सर्वसम्मतं मतम् । तत्रापि पुनः शब्दार्थोभयगतत्वेन एतेषाम् अलङ्काराणां वर्गीकरणं सम्भवति । तत्र अनुप्रासः आद्यः शब्दालङ्कारः । साहित्यदर्पणे एतस्य अलङ्कारस्य निरूपणं सरलतया कृतम् इत्यस्मात् कारणात् अनुप्रासस्य साहित्यदर्पणस्थं लक्षणमवलम्ब्य कालवधकाव्ये एतस्य सन्निवेशं प्रतिपादयामि। अस्य लक्षणं यथा –

> "अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्"। [1] इति।

स्वरमात्रस्य सादृश्यं न तथा चमत्कृतिजनकम् इत्यस्मात् तस्य गणना न कृतात्र। इतः अग्रे अस्य अनुप्रासस्य पञ्चप्रकाराः सम्भवन्ति । ते च यथा छेकः, वृत्तिः, श्रुत्यनुप्रासः, अन्त्यानुप्रासः लाटानुप्रासश्च । एतेषु प्रायेण सर्वेषाम् उदाहरणानि कालवधकाव्ये द्रष्टुं शक्यन्ते। तथापि विस्तृतिभयात् अत्र वैशिष्ट्यपूर्णानामेव प्रतिपादनं क्रियते॥

**कालवधकाव्ये अनुप्रासालङ्कारः**
**1. छेकानुप्रासः**

> "छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा"। [2] इति।

एतैः शब्दैः आचार्यविश्वनाथेन स्वकीये साहित्यदर्पणे छेकानुप्रासस्य लक्षणं कृतम् । अस्य अलङ्कारस्य "छेको विदग्धस्तत्प्रयोज्यत्वादेष छेकानुप्रासः" । [3] इति वैशिष्ट्यमपि तत्रैव प्रतिपादितमस्ति । विदग्धः इति निपुणः जनः तस्मात् प्रयोज्यत्वात् अस्य छेकानुप्रास इति नाम। एतस्य कालवधकाव्यस्थानि कानिचन उदाहरणानि यथा –

> "कालोऽपि कालकुटिलाग्रविषाणकोटि-
> काठोर्यकातरितयोगिनि कासरेन्द्रे।
> प्रत्यन्तदन्तपरिपाति विजिह्मजिह्वा
> लेलिह्यमानरिपुलोहितभाजि रेजे"॥ [4] इति।

अत्र 'कालोऽपि काल', 'कुटि कोटि', 'प्रत्यन्तदन्त', 'लेलिह्यमान लोहित' च एतेषु स्थलेषु व्यञ्जनसङ्घस्य सकृत्साम्यात् छेकानुप्रासः वर्त्तते॥

---
[1] सा. द. १० परिच्छेदः, श्लो. सं. – ३ (पूर्वार्धमेव) पृ. सं. २१४।
[2] सा. द. १० परिच्छेदः, श्लो. सं. – ३ (उत्तरार्धमेव)।
[3] सा. द. १० परिच्छेदः, पृ. सं. – २१५।
[4] का. का. १.२२।

"दण्डोद्यतं तं परितश्चरन्तं
निजं गणो वीक्ष्य मृधाङ्कणेषु।
क्षणं क्षणोत्येष मृधे पुरास्मान्
कालः किलेत्याशयसंशयेऽभूत्" ॥[5] इति।

अस्मिन् पद्ये 'क्षणं क्षणोत्येष', 'कालः किल', 'आशय संशये' च एतेषु स्थानेषु छेकानुप्रासः अवलोक्यते। लक्षणानुगुणमत्र व्यञ्जनसङ्घस्य स्वरूपतः क्रमतश्च एकवारं साम्यम् अस्ति। छेकानुप्रासस्य इतोऽपि एकं वैशिष्ट्यपूर्णम् उदाहरणं यथा -

"तव दिव्यपाणिपरिधूतनिर्लस-
च्छितशूललूननिजकायबन्धनः
शमनोयमस्तशमनां गतिं गतोः
न हि निग्रहोह्ययमनुग्रहः परम्" ॥[6] इति।

अत्रापि 'शमनः शमनां', 'गतिं गतोः', 'निग्रहः अनुग्रहः' च इत्येतेषां व्यञ्जनसमूहानां सकृत्साम्यम् अवलोक्यते अतः अत्रापि छेकानुप्रासः एव॥

**2. वृत्यनुप्रासः**

साहित्यदर्पणानुसारेण वृत्यनुप्रास इति अनुप्रासालङ्कारस्य द्वितीयो भेदः। आचार्यः विश्वनाथः एतस्य अलङ्कारस्य निरूपणप्रसङ्गे एवं वदति, यथा - "रसविषयव्यापारवती वर्णरचना वृत्तिः, तदनुगतत्वेन प्रकर्षेण न्यसनाद् वृत्यनुप्रासः" ।[7] इति। अस्य लक्षणं यथा –

"अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा।
एकस्य सकृदप्येष वृत्यनुप्रास उच्यते" ॥[8] इति।

कालवधकाव्ये दृष्टं किञ्चित् वैशिष्ट्यपूर्णं च एतस्य अनुप्रासप्रकारस्य उदाहरणद्वयं स्पष्टीक्रियते। तद्यथा –

"त्रायस्व चन्द्रतिलकेत्यसकृन्निनाद-
मार्तानिनोद्गतमनीचतमं निशम्य।
हा हा धिगेवमतिमन्थरगामिनोस्मा-
नित्याजगर्ज स जनोति मनोजवोऽपि" ॥[9] इति।

अस्मिन् पद्ये प्रथमे पादे कवर्णस्य, द्वितीये पादे मवर्णस्य तथा च तृतीये पादे हनवर्णयोः च सकृत्साम्यमस्ति। अपि च प्रथमद्वितीयपादयोः तनवर्णयोः, तृतीये मवर्णस्य चतुर्थे च नजवर्णयोश्च असकृत्साम्यमवलोक्यते। अतोऽत्र वृत्यनुप्रास अलङ्कारः॥

"कालस्तु कोपकलिलाकुललोचनार्क-
कान्त्या जिगाय तटिदार्द्रयुगान्तमेधम्।
आलोकयच्च निखिलां निजचित्रगुप्त-
गुप्तां चमूं चलकृपाणलताकरालाम्" ॥[10] इति।

अस्मिन् पद्ये पठणमात्रेणैव वृत्यनुप्रासस्य प्रतीतिः जायते एव। यतो हि अत्र रौद्ररसोऽस्ति अपि च तदनुकूला वर्णरचना दृश्यते अतोऽत्र वृत्यनुप्रासः अलङ्कारः ॥

**3. अन्त्यानुप्रासः**

साहित्यदर्पणे अस्यानुप्रासभेदस्य लक्षणं विश्वनाथेन एवं कृतं, यथा –

"व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत्" ॥[11] इति।

अर्थात् अस्मिन्नलङ्कारे अन्तिमं वर्णं व्यञ्जनमस्ति चेत् तत् आद्येन स्वरेण सह समानमेव भवति। पदस्य अथवा पादस्य अन्ते एव प्रयोज्यत्वादस्य अन्त्यानुप्रासेति अभिधानम्। कृष्णलीलाशुकेन प्रायेण सर्वास्वपि स्वकृतिषु अनुप्रासस्यास्य भेदस्य प्रयोगमधिकं कृतम्। एतस्य कालवधकाव्ये सन्निवेशः स्वल्प एव प्रतिपाद्यते यथा –

"प्रत्येकमेव गगनं ग्रसितुं समर्था-
न्यत्यायतानि परिणाहपरायणानि।
यानानि काञ्चनमयानि विरेजुरेषां
चक्राणि वीक्ष्य निजचक्रमवैन्न चक्री" ॥[12] इति।

अस्मिन् पद्ये पदगत अन्त्यानुप्रासो वर्त्तते। 'समर्थानि अत्यायतानि परिणाहपरायणानि यानानि काञ्चनमयानि' च इत्येतेषु पदेषु यदन्तिमस्य निवर्णस्य आद्येन आ इति स्वरेण सह पदानाम् अन्ते आवर्तनं दृश्यते। अतोऽत्र पदगत अन्त्यानुप्रासो विद्यते। पादगत अन्त्यानुप्रासस्यापि उदाहरणं कालवधकाव्ये द्रष्टुं शक्यते तद्यथा –

"वितरति चिरकाराबन्धनं यद्युपेक्षा
प्रदिशति न च विद्यासम्पदं यद्व्यपेक्षा।
विसृजति निजशश्वन्निस्मृतिं यत्समीक्षा
जयतु भुवनबीजं तत्सितं चासितं च" ॥[13]

अस्मिन् पद्ये पूर्वार्धे पादस्यान्ते अन्त्यानुप्रासः अलङ्कारः द्रष्टुं शक्यते। एवमेव अनुप्रासालङ्कारस्य भेदोपभेदानां बहूनि उदाहरणानि कालवधकाव्ये उपलब्धानि सन्ति। केचिदेव अत्र स्पष्टीकृतानि॥

**उपसंहारः**

भक्तकविः कृष्णलीलाशुकः व्याकरणशास्त्रस्य महान् विद्वान् आसीत्। तस्य साहित्यरचनानाम् अवलोकनेन तस्य कृष्णभक्तेः माहात्म्यमपि ज्ञातं भवति। एतस्य कवेः रचनाः साहित्यशास्त्रीयदृष्ट्या अपि तादृशा एव महत्त्वपूर्णाः सन्ति इति ज्ञानम् अस्य निबन्धस्य पठनेन भवेत्। कालवधकाव्यस्य अभ्यासेन कृष्णलीलाशुकस्य अनुप्रासप्रियता अपि अवगम्यते। काव्येऽस्मिन् वर्तमानानां सर्वेषामपि अनुप्रासेन अलङ्कृतानां पद्यानां निरूपणं नात्र शक्यमिति विषयस्यास्य किञ्चिदेव उन्मीलनं मयात्र कृतम्। तथापि एतत्कार्यम् अलङ्कारदृष्ट्या कालवधकाव्यस्य महत्त्वप्रतिपादनार्थम् पर्याप्तम् स्यात् इति चिन्तनम्। इतोऽपि उचितस्थानेषु अर्थालङ्काराणामपि प्रयोगः अस्मिन् काव्ये दृश्यत एव। किन्तु तेषां प्रतिपादनम् अन्यप्रसङ्गे करिष्यते॥

**सन्दर्भग्रन्थाः**


1. श्रीकृष्णलीलाशुकविरचितं कालवधकाव्यम्।
2. श्रीविश्वनाथकविराजप्रणीतः साहित्यदर्पणः, 2021, वाराणसी, चौखम्बा सुरभारती प्रकाशन।
3. Dr. Menon KPA. Nine gems of Sanskrit literature, volume 3, Delhi, Nag Publishers, 1996.


[5] का. का. १.५२।
[6] का. का. २.५।
[7] सा. द. १० परिच्छेदः, पृ. सं. – २१७।
[8] सा. द. १० परिच्छेदः, श्लो. सं. – ४।
[9] का. का. १.१९।
[10] का. का. १.३०।
[11] सा. द. १० परिच्छेदः, श्लो. सं. – ६।
[12] का. का. १.४१।
[13] का. का. ३.१९।